तु।ॐगुह्यगर्भितांमुष्टिंवध्नीयाद्दक्षपाणिना।रिपुजिह्वाग्रहाख्येयंमुद्रोक्तासर्वत्रुनाशिनी।मुद्रावामपा
दलेतततेतित्रिखंडालक्षणंतारामंत्रेप्रोक्तं।२५।अथसंहारन्याससंहाराख्यमाह।पादयोरि...।पादादिष्वेकैके
मक्षरंन्यसेत्।कलौवेहःकर्णेज्ञाप्कलीति।श्रींनमःपादयोः।ह्रींनमोजंघयोः।इत्यादिप्रयोगः।अथ
संहारन्यासः।२६।२७।वाग्देवतान्यासमाह।अग्नीति।...वह्नीरेफः।...घरोवः।मांसेलः।एतैर्युतोघ
श्चऊकारः।शशांकयुक्बिंदुयुतः।तेनह्ल्रूंषोडशस्वरपूर्वकंतहो...वशिनीशिरसिन्यसेत्
यथा।अंआंइंईंउंऊंऋंॠंलृंॡंएंऐंओंऔंअंअःरह्ल्रूंवशिनीवाग्देवतायैनमःशिरसि।२८।को
धीशेति।क्रोधीशःकः।मांसेलः।एताभ्यांयुतामायाह्रीं।कवर्गपूर्वायस्यदशामेतु...चंयस्या
स्तांकामेश्वरींभालेन्यसेत्।यथा।कंखंगंघंङंक्ल्ह्रींकामेश्वरीवाग्देवतायैनमोललाटे।२९।दीर्घे
ति।दीर्घोनकारः।वह्निरोवः।रो।तोलः।एतैर्युतासांतिरीकारः।कबिंदुयुताच।तेनन्ह्लींचवर्गे

एतद्बीजेन च युतां मोहिनीं मूलषट्के न्यसेत्। यथा। चं छं जं झं ञं न्ह्रौं मोहिनी वाग्देवतायै नमो मूलषट्के २०
अर्घीशो ति अर्घीशा ऊ। कीदृशः वायुमांसस्थः पलो स्थितो यस्मिन्। बिंदुयुतः। तत्तुरीयं चतुर्थं वाग्दे-
वताबीजं तेन ह्रूं। टवर्गस्तद्बीजं च सर्वं यस्यास्तां विमलां कंठे न्यसेत्। यथा। टं ठं डं ढं णं ह्रूं विमलावा-
ग्देवतायै नमः कंठे। ३। अरुणेति। वामनेत्रं इ। कीदृशं अग्नजलबीजः। वैकुंठो मः। रेफः। ते स्थिता यत्र। तत्
स बिंदुश्च। ईदृश त्रांत द्बीजं। तेन ज्म्रीं। तवर्गतद्बीजयुतां महणां हृदि न्यसेत्। यथा। तं थं दं धं नं ज्म्रीं अरुणा
वाग्देवतायै नमो हृदि। ४। वामेति। बियत् हः। हंसः सः। मांसं लः। वालो वः। अनिलो यः। इन्दुर्बिंदुः। ए
तैर्युक्तो वामकर्ण ऊकारः। तेन ह्स्ल्व्यूं। पवर्ग एतद्बीजं च पूर्वं यस्यास्तां जयिनीं नाभौ न्यसेत्। यथा।
पं फं बं भं मं ह्स्ल्व्यूं जयिनी वाग्देवतायै नमो नाभौ। ५। अपार्वतीति दीपिका ऊकारः। कीदृशी पार्वतीशः
तं बीमः। रेफः। वायुर्यः। तैः संयुता इंदुयुक्ता। यवर्गो बीजं च आद्यं यस्यास्तां सर्वेश्वरीं मूलाधारे न्यसेत्

मे.ठा
३७

।यथा।पंरंलवं म्कं सर्वेश्वरी वाग्देवतायै नमो मूलाधारे ।३४। संवर्त्तकेति।संवर्त्तकः क्षः महाका
लोमः रेफः एतैर्युता । बिंदुयुता च शांतिः ई। तेन क्ष्म्र्यीं।सादयो बीजे चार्धं यस्यास्तां कौलिनीं पूर्व
दिपादांतं न्यसेत् । यथा। शंषंसंहं क्ष्म्रीं कौलिनी वाग्देवतायै नमः जान्वादिपादांतं ।३५। वागिति
।ह्रीं ईं नमः। वाग्देवतायै नम इति परं नामांते वशिन्यादिनामांते प्रोच्चरेत् । तत्प्रयोगेषु लिखितं।
३६। स्थित्यासमाह । ब्रह्मरंध्रादिष्वेकैकं वर्णं न्यसेत् । आद्यं ब्रह्मरंध्रे द्वितीयं ललाटे। तृती
यं दृशोः चतुर्थं कर्णयोः। पंचमं नसोः षष्ठं गंडयोः। सप्तमं दंतेषु। अष्टममोष्ठयोः नवमं जिह्वा
यां दशमं मुखमध्ये एकादशं पृष्ठे ।३७। द्वादशं सर्वांगे त्रयोदशं हृदि चतुर्दशं स्तनयोः। पंच
दशं कुक्षौ। षोडशं लिंगे ।३८। स्थितिन्यासमाह । करेति पंचकं अंगुलीषु षष्ठं ब्रह्मरंध्रे। सप्तमं
मुखे।अष्टमं हृदि ।३९। नवमं नाभ्यादिपादांतं। दशमं कंठान्नाभ्यंतं । एकादशं ब्रह्मरंध्रात्कंठं

वंध्याद्यां न्यसेत्। बीजपूर्वं गं अं विघ्नेशह्रीभ्यां नमः। गं आं विघ्नराजश्रीभ्यां नमः इत्यादिमातृकां
स्थाने न्यसेत्। गणेशाः शक्तिसंयुक्ताः विंशोत्तरं गवस्तंपते। इति गणेशमातृकान्यासः। अथ ग्रहमा
तृका तत्र ग्रहरूपिणी सुंदरी देवता। ग्रहमातृकामंत्रस्य दक्षिणामूर्तिऋषिरित्यादि पूर्ववत्।
षडंगध्याने। रक्तं श्वेतं तथा रक्तं श्यामं पीतं च पांडुरं। धूम्रं कृष्णं कृष्णधूम्रं धूम्रधूम्रं विचिंत
येत्। रविमुख्यान् कामरूपान् सर्वाभरणभूषितान्। वामोरुन्यस्तहस्तांश्च दक्षिणेन वरप्रद
न्। एवं ध्यात्वा मातृकास्थानेषु ग्रहान् न्यसेत्। अं १६ सूर्याय रेणुकांबायै नमो हृदि। १। यं ४ चं
चंद्राय अमृतांबायै नमो भ्रूमध्ये। कं ५ मंगलाय धरामांबायै नमो नेत्रयोः। चं ५ बुधाय ज्ञानरूपांबा
यै नमो हृदि। ४। टं ५ बृहस्पतये पद्मासिनांबायै नमो हृदयोपरिभागे। ५। तं ५ शुक्राय पद्मा। कंठे
वायै नमः कंठे। ६। पं ५ शनैश्चराय पद्मासनांबायै नमो नाभौ। ७। यं ५ राहवे कृष्णांबायै नमो मुखे

ठे रे केतवे धूम्रांगायै नमो गुदे ।८। इति ग्रहमातृकान्यासः ४ । नक्षत्रन्यासमाह । नक्षत्रमातृकामंत्रस्य
ऋषिः पूर्वप्रोक्तः गायत्री छंदः नक्षत्ररूपिणी दुर्गा देवता । श्रीविद्यांगत्वेन न्यासे विनियोगः । ध्याने
ज्वलत्कालानलप्रकाशाः सर्वाभरणभूषिताः । नतिमाएयोः ज्ञिनी मुद्रा वरदाभयपाणयः । एवं ध्यात्वा
मातृकापूर्वेन्दंगत्वा ( ) न्यसेत् । यथा । अं आं अश्विन्यै नमो ललाटे ।१। इं भरण्यै नमो दक्षनेत्रे ।२। ईं उं
ऊं कृत्तिकायै नमो वामनेत्रे ।३। ऋं ॠं लृं ॡं रोहिण्यै नमो नासापुटे ।४। एं मृगशिरसे नमो वामक
र्णे ।५। ऐं आर्द्रायै नमो दक्षनासि ।६। ओं औं पुनर्वसवे नमो वामनासि ।७। कं पुष्याय नमः कंठे ।८। खं
गं आश्लेषायै नमो दक्षस्कंधे ।९। घं मघायै नमो वामस्कंधे ।१०। ङं चं पूर्वाफाल्गुन्यै नमो दक्षकूर्प
रे ।११। छं जं उत्तराफाल्गुन्यै नमो वामकूर्परे ।१२। झं ञं हस्ताय नमो दक्षमणिबंधे ।१३। टं ठं चित्रायै
नमो वाममणिबंधे ।१४। डं स्वात्यै नमो दक्षहस्ते ।१५। ढं णं विशाखायै नमो वामहस्ते ।१६। तं थं दं अनुरा

२७

मं॰ली॰
३९।

धायै नमो नाभौ।१७। थं ज्येष्ठायै नमो दक्षकटौ।१८। नं पं फं मूलायै नमो वामकटौ।१९। वं पूर्वाषाढायै नमो दक्षोरौ।२०। मं उत्तराषाढायै नमो वामोरौ।२१। मं श्रवणायै नमो दक्षजानुनि।२२। ऊं रं धनिष्ठायै नमो वामजानुनि।२३। लं शततारकायै नमो दक्षजंघायां।२४। वं शं पूर्वाभाद्रपदायै नमो वामजंघायां।२५। षं सं हं उत्तराभाद्रपदायै नमो दक्षपादे।२६। लं क्षं अं अः रेवत्यै नमो वामपादे।२७। इति नक्षत्रमातृकान्यासः। एवं न्यासेष्वादौ मायाश्रीबीजे योज्ये। न्यासान्सर्वान्कुर्वीत मायाश्रीबीजपूर्वकान्। इत्युक्तत्वात्। योगिनीन्यासस्य मुनिश्छंदसी पूर्वोक्ते। योगिनीरूपासुंदरी देवता श्रीबीजांगत्वेन विनियोगः। ध्यानं। सितासिताऽरुणा धूम्रा चित्रा पीता श्च चिंतयेत्। चतुर्भुजाः समैर्वक्त्रैः सर्वाभरणभूषिताः। एवं ध्यात्वा न्यसेत् श्री डां डीं डमलवयूं डाकिन्यै नमः। ऐं १ हृ। मम त्वचं रक्ष रक्ष त्वगात्मने नमः। कंठदेशे विशुद्धौ। ह्रीं श्रीं रां रीं रमलवयूं राकिन्यै नमः। ऐं २। मम रक्तं रक्ष रक्ष असृगात्मने

नमो हृद्घनाहते। लां लीं लमलवर्यूं लाकिन्यै नमः डं १०। ममांसं रसरक्तमांसात्मने नमः नाभौ मणिपू
रे। कां कीं कमलवर्यूं काकिन्यै नमः वं ६ ममभेदो रसरक्तमेदात्मने नमो लिंगमूले स्वाधिष्ठाने। शां
शीं शमलवर्यूं शाकिन्यै नमः वं ४ ममास्थि रसरक्तमेदोमांसास्थ्यात्मने नमो गुदे मूलाधारे। हां हीं हमलवर्यूं
हाकिन्यै नमः। हं ३ं ममममज्जां रसरक्तमज्जात्मने नमो भ्रूमध्ये आज्ञाचक्रे। यां यीं यमलवर्यूं याकिन्यै
नमः ई ५ ममशुक्रं रसरक्तशुक्रात्मने नमो ब्रह्मरंध्रे। इति योगिनीमातृका। राशिमातृकामंत्रस्यानु
लिखं दसी पूर्वोक्ते राशिरूपा सुंदरी देवता श्रीविद्यांगत्वेन विनियोगः। ध्यानं। रक्तश्वेतहरिद्वर्णपांडु
चित्रासितान्स्मरेत्। पिशंगकपिलौ बभ्रुकर्बुरासितधूम्रभान्। एवं ध्यात्वा न्यसेत्। अं आं इं ईं मेषा
यनमो दक्षपादगुल्फे। उं ऊं ऋं वृषाय नमो दक्षजानुनि। ॠं लृं लॄं मिथुनाय नमो दक्षवृषणे। एं ऐं कर्कायन
मो दक्षकुक्षौ। ओं औं सिंहाय नमो दक्षस्कंधे। अं अः शं षं सं हं कन्यायै नमो दक्षशिरोभागे। कं ५ तुला

यैनमो वाम शिरोभागे। चं पञ्चाक्षिकायनमो वाम स्कंधे। टं पञ्चाग्निने नमो वाम कुक्षौ। तं पमकरायन
मो वाम हृषणे। थं पकुंभायनमो वाम जानुनि। यं रं लं वं दं मीनायनमो वाम गुल्फे इति राशिमातृका।
पीठमातृकामंत्रस्य मुनिछंदोंगानि पूर्ववत्। पीठरूपिणी सुंदरी देवता श्रीविद्यांगत्वेन विनियोगः
ध्यानं। सितासितारुणश्यामहरित्पीतान्यनुक्रमात्। पुनरेतत्क्रमादेकपंचाशद्वर्णसंचये। पीठानी
हस्मरेद्विद्वान्सर्वकामार्थसिद्धये। एवं ध्यात्वा मातृकास्थानेषु मातृकावर्णपूर्वाणि पीठानि न्यसेत्
यथा। ह्रीं श्रीं अं कामरूपपीठायनमः। ह्रीं श्रीं आं वाराणसीपीठायनमः। इं नेपाल। ईं पौंड्रवर्द्धन। उं
काश्मीर। ऊं कान्यकुब्ज। ऋं पूर्णगिरि। ॠं अर्बुद। लृं आम्रातकेश्वर। ॡं एकाम्र। एं त्रिस्रोतस्। ऐं का
मकोट। ओं कैलास। औं भृगु। अं केदार। अः चंद्रपुर। कं श्रीपीठ। खं ॐकार। गं जालंधर। घं मालव
ङं कुलांत। चं कोट्टक। छं गोकर्ण। जं मारुतेश्वर। झं अट्टहास। ञं विरज। टं राजगृह। ठं महापथ। डं को

ग्रेगिरि। ढं एलापुर। णं कालेश्वर। तं जयंती। थं उज्जयिनी। दं चरित्रा। धं क्षीरिका। नं हस्तिनापुर। पं उड्डु। फं
प्रयाग। बं षष्ठीश। भं मायापुरी। मं जलेश्वर। यं मलय। रं श्रीशैल। लं मेरु। वं माहेंद्र। शं वामन। षं हिरण्य
सं महालक्ष्मी। हं उड्डियान। लं छाया। क्षं छत्रपुर पीठाय नमः। इति पीठन्यासः। इति षोढान्यासः। एवं
न्यासान्कृत्वा मुद्राः प्रदर्शयेत्ता आह। मुद्रा इति। नव तासां मध्ये संक्षोभद्रावणाकर्षवेचरीबीजा
ख्यानां पंचानां लक्षणमर्के। तत्स्वरूपं मुच्यते। तत्र वश्यमुद्रालक्षणं यथा पुटाकारौ करौ कृत्वा त
र्जन्यावंकुशाकृती। परिवर्त्तक्रमेणैव मध्यमे तदधोगते। क्रमेण देवि तेनैव कनिष्ठानामिकाद्वयः
संयोज्य निबिडाः सर्वाः अंगुष्ठावग्रदेशतः। मुद्रेयं परमेशानि सर्ववश्यकरी मतेति। उन्मादमुद्राल
क्षणं यथा। संमुखौ तु करौ कृत्वा मध्यमामध्यमे अनुजे। अनामिके तु सरले तद्बहिस्तर्जनीद्वयं।
दंडाकारौ ततोंगुष्ठौ मध्यमानखदेशगौ। मुद्रैषोन्मादिनी नाम क्लेदिनी सर्वयोषितामिति। महां

म.टी.
५१

कुशमुद्रालक्षणं यथा। अथ अनामिकायुग्ममधः कृत्वांकुशाकृति। तर्जन्यावपि तन्मैव क्रमेण वि
नियोजयेत्। इयं महाकुशामुद्रा सर्वकामार्थसाधिनीति योनिमाह। नात्र महायोनिमुद्रा। ततः अस्याः लक्षणं
यथा। मध्यमे कुटिले कृत्वा तर्जन्युपरिसंस्थिते। अनामिकामध्यगते तथैव च कनिष्ठिके। सर्वाए
कत्र संयोज्या अंगुष्ठपरिपीडिताः। एषा तु प्रथमा मुद्रा महायोन्यभिधामकेति। ५०। मुद्रा एवं प्र
दर्श्य ध्यायेत्। ध्यानमाह। बालेति। नानालंकृतयो विविधाभरणानि तै राजमानं शोभमानं वपु
र्यस्यास्तां। बालेंदुरार्द्रचंद्रः शेखरे यस्यास्तां। सृणिमंकुशं। सुमं पुष्पबाणं। बाणांकुशौ दक्षयोः।
इक्षुधनुः पाशौ वामयोः। श्रीचक्रं वक्ष्यमाणं तत्र स्थितां सुंदरीं त्रिपुरसुंदरीं ध्यायेत्। ५१। हय
मारः करवीरः। ५२। श्रीचक्रमाह। श्रीचक्रस्येति। ५३। मन्वस्रं चतुर्दशारं। ५४। पात्रस्थापनमा
ह। वहदिति। वहंती या नाडी दक्षा वामा वा तत्हस्तेन स्वाग्रे त्रिकोणादियंत्रं विलिख्य तत्रालक्ता

ल्लितं पात्राधारं स्थापयेत्॥५७॥ एकत्रिंशद्दशरमंत्रेण धारं पूजयेत्तत्माह। वह्निरेफः दीर्घत्रययुक्तः

रां रीं रूं रस्वरूपं मांतो मः। लवरस्वरूपं। अनिलो यः। एते वामकर्णेन्दुसंयुताः। ऊबिंदुताः वायव्यः क

लाः। माडे समन्वितं चतुर्थ्यन्तः। वाग्बीजं ऐं। पवनो यः। स्वरूपमन्यत्। यथा। ऐं रां रीं रूं रमलवरयूं रंअ

ग्निमंडलाय धर्मप्रददशकलात्मने ऐं कलशाधारायनमः॥६०॥ आदक्षिणादिति। तदुपरि पात्रा

धारोपरि। आग्नेयीर्दश कला अर्चयेत्। ता एवाह। धूम्रार्चिरिति हि व्यक्तमादि कावहाह व्यवह

कव्यवहा च। कीदृश्यस्ताः स्वबिंदवो यादिदशवर्णभासमा यास्तु॥६१॥ कलेति। नाम्नां धूम्रार्चिरि

त्यादीनामंते कलेत्यादिपदमुच्चरेत्। यं धूम्रार्चिकलाश्रीपादुकां पूजयामि। रं ऊष्माकलाश्री

पादुकां पूजयामीति प्रयोगः॥६२॥ स्वर्णादि निर्मितं कलशं। अस्त्रायफडिति प्रक्षाल्य तत्राधारे न्य

सेत्। तं त्रिंशद्वर्णमंत्रेणार्चयेत्। तमुद्धरति। वियदिति। वियत् हकारः। दीर्घत्रययाढं। हां हीं हूं

रूमस्वरूपं। मां लंलः वरस्वरूपं। अनिलोपः। ६४। अर्घीशा ऊ। सेंदुवं सबिंदु ईः। वायुर्यः। ६५।
मन्मथः क्लीं स्मरमन्यत्। यथा। ईं हां ह्रीं हूं हमलवयूं हस्रूर्यमंडलाय वसुप्रदशादशाकलात्मने
क्लीं कमलशायनमः इति। ६६। सूर्यकलाः आतपिनीति। ६७। कोट्स्य पस्ताः। अनुलोमेति। क्रमो
क्रमाभ्यां पैकादयो नादश्च बलिः। तेषां षु जो षु म्मानि ते प्लुताः। कं भं आतपिन्यै नमः। खं बं तापि
न्यै नमः। गं फं धूम्रायै नम इत्यादि। ६८। पूर्ववत्। तपिनी कालाश्मीपादुकां पूजयामीति प्रयोग।
६९। दंतान्तरेण द्वात्रिंशाद्वर्णेन तमेवोद्धरति। मनुरिति। मनुः सः दीर्घत्रयप्लुतः। सां सीं सूं। अग्रे
प्लुतः। अग्नीरः वायुर्यः। एते अर्घी त्रैं दुप्लुताः। ऊ बिंदुप्लुता ऊं प्लुतश्चतुर्थ्यंतः। मनुः सः। मनुः प्रो
ऊं प्लुतं कलशामृतं। कलशामृताय। तारादिहृदंतः प्रणवादिनमोंतः। यथा। सां सीं सूं स
मलवरयूं सं सोममंडलाय कामप्रदषोडशकलात्मने सोः कलशामृताय नमः। मंत्रोपज

लर्चने ।७२। षोडशस्वरा आश्वांडीः कलास्तत्रलेर्चयेत् । ताऽसाह ।ऽप्रमतेति । यथा ।७३। भैरवमंत्र
माह । हसेति । हसक्षमलवेति स्वरूपं । पानीयं वः । वन्हिरः । ईरोयः । ऽसद्यो वाऊ । विंदुश्च एतैर्यु
तं । बीजं स्वरूपमन्मत । यथा । हसक्षमलवरयूं ऽआनंदभैरवाय वौषट् । दक्षार्णः । सुधादेवीमं
त्रमाह । हसयोरिति । पूर्वोक्तबीजे हसयो वैपरीत्यं सहक्षमलवरयूं सुधादेव्यै वौषट् । मुस्यन्तः
सद्भार्णः ।७६। मत्स्येति । मत्स्यमुद्रालक्षणं यथा । वामोपरिष्टात्संस्थाप्य दक्षहस्तं प्रसारयेत् । अं
गुष्ठौ नुतयोः पार्श्वे मत्स्यमुद्रेयमीरितेति ।ऽप्रस्त्र कवचमुद्रे वक्ष्यते येनमुद्रोक्ता । संरोधिनी
वक्ष्यते ।७७। मुशलेन मुद्रा यथा । मुष्टिं कृत्वा तु हस्ताभ्यां वामस्योपरि दक्षिणं कुर्यान्मुशलमु
द्रेयं सर्वविघ्ननिवारिणीति । चक्रमुद्रा यथा । हस्तौ तु सम्मुखौ कृत्वा संलग्नौ सुप्रसारितौ कनि
ष्ठांगुष्ठकौ = रेखाचक्रसंज्ञकेति । महामुद्रा वक्ष्यते । योनिमुद्रोक्ता ।७८।७९। ऽप्रवेति द्वे । ऽसा

31

मं.टी.
४३

दयः षोडशस्वराः। कादयो तान्ताः। याद्यः सान्ताः। तैरष्टवर्गैस्त्रिकोणं संचिंत्य। कौ ह स्त्रां ह्रीं श्मां म ध्येयो
मितं तं मा। ऐं क्लीं सौरिति। बालां संपूजयेत्। ८०। अष्टवर्णमाह। तारेति। तारं ऐं माया ह्रीं इंदु श्री म हे
श्वरी मन्युः सः। स स हस्रो भुतः सः सो। बिंदु पुंदरा हो हः हं। स्वाहा स्वरूपं। समीरिता मुद्रा मत्स्या धान व
मुद्राः कुर्यात्। ८१। शंख स्थापने धूपस्थापने च कलशस्थापनाग्नि ऊहः। शंखं पदम र्घ्यपदं च प्रयोज्यं
८३। पीठपूजामाह मिंदुकमिति। कालवन्हीरां कालाग्निरुद्रं। ८५। स्वर्णां डिम्भैरुः। ८६। धर्मवा
रणं क्षेत्रं। धर्मादिकान् धर्मज्ञानवैराग्यैश्वर्याणि। ८७। नञ्पूर्वान् धर्मादीन्। ८८। तारमात्र
अपाद्यं अंतं मं पूर्वं सूर्यसोमाग्निमंडलं। गुणान् सत्वरजस्तमांसि। स्ववर्णाद्यान् संसत्वायन
मः। इत्यादि। आत्मानमित्यादीन्मा आत्मान्तरा दीन्। आं आत्मने। अं अंतरात्मने। मं परमात्मने।
८९। परादिकमाया वीजाद्यं ज्ञानात्मनं। ह्रीं ज्ञानात्मने। मया तत्वादीनि स्ववर्णाद्यानि। मं

मायानमइत्यादि।९०। ब्रह्मविष्णुरुद्रेश्वरसदाशिवान्प्रेतरूपांस्तान्। ब्रह्मप्रेतायनमइत्या
दि।९१।९२। काष्ठास्तु दिक्षु। पीठंन्यासीकारात्मा। इत्युक्तेति।९३। पीठमंत्रमुद्धरति। वागिति। वाक्
ऐं। केशवः अः। लीय। दामोदरात्सृष्टः ऐं युतः। ये। तामीयहसौः। हृदयांतिकः नमोंतः। स्वरूपमाम
न्। यथा। ऐं परायै अपरायै हसौः सदाशिवमहाप्रेतपद्मासनाय नमइ। ति।९३। पुष्पांजलिमं
त्रमाह। अकरेति। मंत्रमुक्तमेव। निमायारमादिकः। यथा। ह्रीं श्रीं अगकटगुमगुमतरसेक्षर
मकुलकौलनिगर्भरहस्यातिरहस्यपरापररहस्यसंज्ञक श्रीचक्रगतयोगिनीपादुकाभ्यो
नमः। इति। धर्षैरावाण वर्णाः एकपंचाशदक्षराः।१००। त्रिखंडमुद्रोक्ता।१०१। आवाहनमाह
। चैतन्येति।१०२।१०३। स्थापन्यादीमुद्रा वदंति।१०७।१०९।११०।१११। इति श्रीमंत्रमहोदधि टी
कायां नौकायां श्रीविद्यादिकथनं नाम एकादशस्तरंगः।११। श्रीविद्यामाश्रावर्णनं वक्तुं

ऋतिजानीते। श्रीविद्यापाद इति। येन मनोरथा। धकमाप्नोति।१। मुक्तापदे कामेश्वर्यादि विचित्रो
ताः। विंदुपरितः त्रैं। कलिते त्रिकोणे इति पार्श्वे वामावर्तेन पंचपंचसंपूज्य विंदौ षोडशीं मूलेन य
जेत्। रूपत्रितु विचित्राद्याः कामेश्वर्यंताः स्वस्वमंत्रेण तर्पणेन संपूज्य मध्ये षोडशीं यजेत्। त
त्र विधिमाह। एकैकमिति। एकैकं स्वरमुत्क्वा वदनमारभ्य एकैके नित्यामंत्रे च प्रोच्य नित्यानामांते
ऽमुकनित्याश्रीपादुकां पूजयामीति। दक्षहस्तेन पुष्पं चंदनाक्षतानि तर्पयामीति। वामहस्ते
न जलं चार्घ्यं पेत् जले ऽमाईके गात्मेमितिकेचित्। नित्यामंत्रेषु कामेश्वरीमंत्रमाह। वालेतिवा
लापूर्वोक्ता। तारः प्रणवः। सहकेइपुतः दीर्घस्थाले जनादिमध्यस्थौ। नमर्हुं। पंचवाणाः द्रांद्रींक्लीं
ब्लूंसः। इति। कुमारिका वाला प्रतिलोमा। सौः क्लीं ऐं। यथा। ॐ ऐं क्लीं सौः ॐ नमः कामेश्वरि इच्छा
कामफलप्रदे सर्वसत्ववशंकरि सर्वजगत्क्षोभणकरि हुं हुं हुं द्रां द्रीं क्लीं ब्लूं सः सौः क्लीं ऐं कामेश्वरी

नित्याश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इति ॥ ९ ॥ भगमालिनीमाह । वाग्भिति । वाग्बीजं ऐं । कर्णेन्दु
विन्दुः ॥ १० ॥ सद्योवक्त्रौः ग्निः ॐ ञ्रुतो रः रू । दीर्घा स्मृतिर्गा । भस्मीरेफः ॥ ११ ॥ वह्निर्दीप्तः पावकः ॥ एपुतो
रः रेफेन्द्रावः ॥ भः ॥ १३ ॥ लोकं ऐं ॥ १४ ॥ भारूतोपः ॥ १५ ॥ माया ह्रीं स्वरूपमनन्ततः । भगत्रिसूवर्णं षट्त्रिंशद्युत्त
रशतार्णं भगमालिनी । यथा ॥ ऐं भगभुगे भगिनि भगोदरि भगमाले भगावहे भगगुह्ये भगयोने
भगनिपातिनि सर्वभगवशंकरि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वभगानि मे ह्यानय वरदे रेते सु
रेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय सर्वसत्त्वान् भगेश्वरि ऐं ब्लूं जं
ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं हर ब्लें ह्रीं भगमालिनी नित्याश्रीपादु
कां पूजयामि नमः ॥ नित्यक्लिन्नामन्त्रमाह ॥ नित्येति ॥ पद्मनाभयुतं जलं एपुतो वः वे ॥ १६ ॥ माया ह्रीं
तदाद्या ॥ भग ग्निप्रिया स्वाहा । तदन्ता हि वा ह्वराएकादशार्णा ॥ यथा ॥ ह्रीं क्लिन्ने नित्यमदद्रवे स्वाहा

..टी.
४५

नित्यक्लिन्नानित्याश्रीपादुकांपूजयामिः।भेरुंडामंत्रमाह।वंतेति।वोंतोमः।रेफयुतः।तारसंयुत
श्च॰भ्रोयुतः।भ्रों।सकोरस्राः।भ्रंकुशासंयुतः।क्रोमिति।बीजेनादावंतेयुतः।१७।चवर्गस्यचत्वारोवर्णा
वह्निविंदुसंयुताः॰भ्रौविंदुयुताः।झ्रौं छ्रौं ज्रौं झ्रौं स्वाहांतः।प्रणवाद्यः।दशवर्णः।यथा।ईं ॐ क्रों म्रों क्रों
च्रौं छ्रौं ज्रौं झ्रौं स्वाहा।भेरुंडानित्याश्रीपादुकांपूजयामि।१८।वह्निवासिनीमंत्रमाह।मायेतिःस्प
ष्टः।यथा।ॐ ह्रीं वह्निवासिन्यैनमः।वह्निवासिनीनित्याश्रीपादुकांपू॰।१९।महाविद्येश्वरीमाह
तारेति।मायाह्रीं।श्रि॰त्रोफः।वह्निःपवनामेंदुसंयुतः।२०।विंदुयुतः।फ्रें।सविसर्गोमंत्रकः।सः।
२०।मन्त्रवर्णश्चतुर्दशार्णः।यथा।ॐ ह्रीं फ्रें सः नित्यक्लिन्नेमदद्रवेस्वाहा।महाविद्येश्वरीनित्या
श्री॰शिवदूतीमंत्रमाह।शिवेति।यथा।ॐ ह्रीं शिवदूत्यैनमः।शिवदूतीनित्याश्रीपादुकांपू॰।२१
त्वरितामाहमंत्रं।तारइति।तारॐ।पराह्रीं।वर्महुं।खेचछेक्षस्वरूपं।वामकर्णयुक्।त्री

युतं वगागनं। ऊ विंदुयुतो हः। हूं। मेरुः स्त्रः। नगं एयुतः। स्त्रे। क्रां ङिस्ना ह्रीं। यथा। स्त्रं ईं ह्रीं हुं स्त्रे चं क्षे स्त्री हूं स्त्रे ह्रीं। फट् त्वा त्वरिता नित्या। २२। कुलसुंदरी मंत्रमाह। दामोदरेति। दामोदरं ऐ। विंदुयुत ऐं। क्लीं। शांतींदुसंयुतौ॥ स्क्रौं। मनुविसर्गा। ठौ। भृगुः। श्रौ सर्गयुतः सः सौ। यथा। ल्लं ऐं क्लीं सौः। कुलसुंदरी नि। २४। नित्यामंत्रमाह। भैरवी। तिप्राक् क्रमात् पश्चाद् उत्क्रमात् बालया युता त्रिपुरभैरवी। ततः पंचपंचाणबीजानि। एषा मन्वक्षरा चतुर्दशार्णा नित्या ईरिता। यथा। ल्लं ऐं क्लीं सौं। ह्सैं ह्स्क्लीं ह्सौं सौः क्लीं ऐं द्रां द्रीं क्लीं ब्लूं सः। नित्या शाक्तिसंयुतौ। एविंदुयुतौ। क्रें। हंसः सः। अग्न्यधीश। विद्या ठः र ऊ विंदुयुतः स्त्रूं। हः स्त्रे ब्लां ह्रीं। गं कुशः क्रौं। नित्यमदद्रवे स्वरूपं। वर्म हुं। स्फरिः क्रौं। यथा। ऐं ईं ह्रीं क्रें स्त्रूं क्रौं क्रौं नित्यमदद्रवे हुं क्रौं नीलपताकिनी नि। २७। विजयामंत्रमाह। वराहेति। वराहोहः। हंसः सः चंडीशः। खः। जनार्दनः फः। हृस्रांतरः। एते पंचनामेंदुयुताः। एविंदुयुता। एतत्कूटं। स्वरूपमन्यत्। यथा

34

ऐं ह्स्क्लैं विजयायै नमः। विजया ॥ २८ ॥ सर्वमंगलामाह। तारा द्याविति भृगुरवस्त्रीशौ। स्त्रौं। नारई कार
युतौ। स्त्रौं। ङेंता चतुर्थ्येकवचनांता। यथा। ओं स्त्रौं सर्वमंगलायै नमः। ज्वालामालिनीमंत्रमाह। वर्मा
ता हुं फडंता। अष्टयुगा दशाष्टचत्वारिंशाद्वर्णो ज्वालामालिन्युदिता। यथा। ॐ नमो भगवति ज्वा
लामालिनि देवि सर्वभूतसंहारकारिके जातवेदसि ज्वलंति ज्वलंति ज्वल ज्वल प्रज्वल हुं रं रं हुं फ
ट्। ३१। विचित्रामंत्रमाह। कूर्मेति। कूर्मः चकारः। क्रोधी ऌ। आमन्विंदुसंयुतौ। ककार ओ विंदुयुतः। यथा
ॐ क्रौं विचित्रा नित्या श्रीपादुकां पूजयामि। उक्ता इति ताः पंचदश नित्याः। ३३। एतास्त्रिकोणे पंचशः
संपूज्य विंदौ मूलेन षोडशीं यजेत्। यथा ॐ मूलं महात्रिपुरसुंदरी नित्या श्रीपादुकां पूजयामि
तर्पयामि नमः। विंदुत्रिकोणयोर्मध्ये त्रिभंगीभिः पंक्तित्रयेण गुरून् यजेत्। ३४। तेत्रिविधा इत्या
ह। दिव्यौघा इति। दिव्यौघानाह। परप्रकाशा इति। ३५। सिद्धौघानाह। भोग इति। ३७। मानवौघा

नाह। गगन इति। ३८। पुमांसो गुरव ऐं आनंदनाथ शब्दांताः कार्याः। स्त्रियो गुरवस्तु ऐं अंबा शब्दांताः ३९
कति स्त्रियः कति मानवा इत्यत्राह। परशक्ति रिति। दिव्य गुरुषु परशक्तिस्तु कादेवी कामेश्वर्यस्ति
स्त्रः स्त्रियश्चत्वारोन्ये पुमांसः मानव गुरुषु क्रिया लीलेति स्त्रियौ षडन्ये नराः। सिद्ध गुरुषु चत्वारः
पुमांस एव। तथा च प्रयोगः। परप्रकाशानंदनाथ श्री पादुकां पू: परशक्त्यंबा श्री पादुकां पूजया
मि। इत्यादि। ४१। बिंदोः प्रागादि दिक्षु पूर्वाम्नाय देवता श्री पादुकां पू। दक्षिणाम्नाय देवता श्रीपा
दुकां पू। इत्यादि चतुर आम्नायान्प्रपूजयेत्। ततः पंचपंचिकाः पूजयेत्। ऐं ह्रीं मूलेन मध्ये
द्वितीयाद्याः दिक्षु स्वस्वमंत्रैः। एवं मन्याः पंचिकाः। ४४। तासु प्रथमपंचिकामाह। श्रीविद्येति
ऐं आद्यपंचकं लक्ष्मी संज्ञं। ४४। द्वितीय पंचकं कोश संज्ञं। ४५। तृतीय पंचकं कल्पलता संज्ञं। ४६।
चतुर्थ पंचकं कामधेनु संज्ञं। ४७। पंचम पंचकं रत्न संज्ञं। ४८। तासां क्रमान्मंत्रान्वदति। तत्राद्यपं

35

चक्रे मूलेन श्री विद्यामध्ये पूज्यादित्युक्तलक्ष्म्याद्याः तत्र लक्ष्मीमंत्रमाह। वकेशाद्वृत्ति। वकेशः। श। ई
रेफस्तद्युतः। तेन श्रीं। लक्ष्मीश्रीपादुकां पू०। इति पूर्वे ५०। महालक्ष्मीमंत्रमाह। तारेति। तारः ॐ। प
द्मा श्रीं। शक्तिः ह्रीं। पद्मा श्रीं। लक्ष्मीः श्रीं। माया ह्रीं। पद्मा श्रीं। क्रमवर्णस्वरूपं ज्ञेयं। यथा। ॐ श्रीं ह्रीं श्रीं
कमले कमलालये प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः। महालक्ष्मीश्रीपादुकां पू० इति दक्षिणे
५२। त्रिशक्तिमंत्रमाह। लक्ष्मीः श्रीं। माया ह्रीं। मनोजन्मा क्लीं। यथा। श्रीं ह्रीं क्लीं त्रिशक्तिश्रीपा०
पश्चिमे। ५३। सर्वसाम्राज्यमंत्रमाह। भृग्विति। भृगुः सः। आकाशो हः। कल एते मायास्थिताः
कूटं पद्मालया श्रीं। तेन युताः। यथा। श्रीं सहकल ह्रीं श्रीं सर्वसाम्राज्यल० उत्तरे। ५४। द्वितीय
पंचके परंज्योतिर्मंत्रमाह। तारेति। तारः ॐ। माया ह्रीं। यथा। ॐ ह्रीं हंसः सोऽहं स्वाहा। परंज्योतिः पू
र्वे। ५५। परनिष्कलशांभवीमंत्रमाह। प्रणवस्तन्मंत्रः। यथा। ॐ परनिष्कलशांभवीश्रीपा०

दक्षिणे। अजपामाह। नमबूतिनमोहः। मजुःसः। यथा हंसः अजपाश्रीपादुकां पू॰ पश्चिमे। ५६।
आदिक्षांतिवर्णा नु मातृका। अं आं इं॰ क्षं मातृकाश्रीपादु॰ उत्तरे। ५७। कल्पलता पंच के त्वरिता
माह। मएव इति। भवनेशानी ह्रीं मेरुः दः। सहिं हिं ग्राटीएयुतः। क्षः। यथा। ॐ ह्रीं हुं खेचछे क्षः स्त्रीं हूं
क्षें ह्रीं फट्। त्वरिताश्रीपा॰ पूर्वे। ५८। पारिजातेश्वरीमंत्रमाह। आकाशेति। आकाशो हः हंसः क्रों
धीराः कः पिनाकी शैलः। ह्रस्वरूपं। अधरऐ। एतेसबिंदवः कूटं। तारमायासंपुटं। यथा। ॐ ह्रीं ह
सकलह्रीं ऐं ह्रीं सरस्वत्यै नमः पारिजातेश्वरीपा॰ दक्षिणे। ६०। त्रिपुटामंत्रमाह। रमेति। मनोभूः
क्लीं। यथा। श्रीं ह्रीं क्लीं त्रिपुटाश्रीपा॰ पश्चिमे। ग्लौं ब्लूं क्लीं ब्लूं सः पंचबाणेशीश्री॰ उत्तरे। ६१। कामधे
नुपंचके। अमृतपीठेशीमंत्रमाह। वाग्गीति। ऐं क्लीं सौः। अमृतपीठेशीश्री॰ पूर्वे। ६२। सुधाश्रीमंत्र
माहानमइति। नमो हः। मजुसः। अग्नीरः। एते वामनेत्रयुताः। ईकारयुताः सबिंदवश्च। ह्स्रीं

36

मं.दी.
५८

६३। सा प्राप्तुवनेश्वानी स्त्रीं श्रीः श्रीं। कमला प्राप्तुवनेश्वरी ल्क्रीं। वेदार्णश्च तुर्वर्णोऽयं। स्तुप्याम्मीमं
त्रः। तेनेतामथ वाक् दक्षिणे यजेत्। यथा। स्त्रीं ह्सौं श्रीं ल्क्रीं। स्तुप्या श्रीं श्रीपा० ।६४। अमृतेश्वरीमं
त्रमाह। सकारेति। अनुग्रहो गृह्णे ऐ युतः। अमृतपूर्विका वाक् स युतं वाग्बीजं। यथा। सौः क्लीं
हैं। अमृतेश्वरी श्रीपा० पश्चिमे।६५। अन्नपूर्णा नवमे तरंगेऽष्टका। तेनोत्तरे तां यजेत्। यथा। ॐ ह्रीं श्रीं
क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा। अन्नपूर्णा श्रीपा०।६६। रत्नपंचके सिद्धलक्ष्मीमा
माह। वाणीति। वाणी बीजं ऐं। कामबीजः क्लीं। वराह स्मा ग्निवर्ण हसरा। औ विसर्गयुताः ह्सौः
स्वरूपमन्यत्। यथा। ऐं क्लीं न्ले क्लीं मदद्रवे कुले ह्सौः सिद्धलक्ष्मी श्रीपा० पूर्वे। दक्षिणे तु मा
तंगी।६७। तन्मंत्रमाह। वागिति। वाक् ऐं। कामः क्लीं। वाणी ऐं माया ह्रीं। लक्ष्मी श्रीं। क्रमवर्णो।६८
नेत्र समन्वितो मेघोन नि।७०। रमा श्रीं। अंगजः क्लीं। स्वरूपमन्यत्। यथा। ऐं क्लीं सौं ऐं ह्रीं श्रीं ॐ न

मो भगवति मातङ्गेश्वरि सर्वजनमनोहरि सर्वराजवशंकरि सर्वमुखरंजिनि सर्वस्त्रीपुरुषव
शंकरि सर्वदुष्टमृगवशंकरि सर्वलोकवशंकरि ह्रीं श्रीं क्लीं ऐं मातङ्गीश्रीपा॰ ७२ भुवनेश्वरीमाह
गगनमिति। गगनं हः। वह्निनारेफेणः वामनेत्रैं दुम्बां ई विंदुम्बां युतः। यथा। ह्रीं भुवनेश्वरीश्रीपा
दुकां पू॰ पश्चिमे। ७३। हरामेत रंगो वेदरुन्द्रस्वरो मनुश्चतुर्दशो नत्यात वर्णो वाराहीमंत्रकः। तेनत
मुत्तरे यजेत्। ॐ ऐं ग्लौं ऐं नमो भगवति वार्तालि वाराहि वाराहमुखि ऐं ग्लौं ऐं अंधे अंधिनि नमः
रुंधे रुंधिनि नमः जंभे जंभिनि नमः मोहे मोहिनि नमः स्तंभे स्तंभिनि नमः ऐं ग्लौं ऐं सर्वदुष्टप्रदुष्टानां स
र्वेषां सर्ववाक्चित्तचक्षुर्मुखगतिजिह्वास्तंभं कुरु कुरु शीघ्रं वश्यं कुरु कुरु ऐं ग्लौं ऐं ठः ठः ठः ठः
हुं फट् स्वाहा। वाराही श्रीपा॰ ७४। एवं पंचपंचिकाः संपूज्य दर्शनानि यजेत्। अथ षष्ठं। ७५। शैव
दर्शनश्रीपा॰ शाक्तदर्शनश्रीपा॰ इत्यादि। ७६। इनमुद्रामाह। साचेति। अंगुष्ठतर्जनीयोगे ह्या

37

नमुद्रा ।७७। भूबिंबमारभ्य बिंदुपर्यंतं ज्ञातिक्रमेण वावरणपूजा । आवरणदेवतानामादौ मायाबी
जं । अंते तत्श्रीपादुकां पूजयामीति प्रयोगः । आग्नेये हृत् ऐशान्ये शिरः नैरृत्ये शिखा । वायव्ये कवचं पु
रो नेत्रं । दिक्ष्वस्त्रं । यथा । श्रीं ह्रीं क्लीं ऐं सौः हृदयांगदेवता श्रीपा० त्रैरेखं भूगृहमस्ति ।८०। तस्याद्यु
रेखायां अष्टदिक्षु ऊर्ध्वे अधश्च अणिमाद्या दश सिद्धीर्यजेत् । ह्रीं श्रीं अणिमासिद्धि श्रीपादुकां पूजया
मीत्यादि प्रयोगः ।८१। तासां ध्यानमाह । इष्टं कुर्वन्तु राध्वरा वामे पात्रधराः साधके भोरत्नसमूहान् दद
तीः ।८२। गृह द्वितीय रेखायां पश्चिमादि ब्राह्म्याद्या अष्टमातृर्यजेत् । ह्रीं श्रीं ब्राह्मी मातृश्रीपादुकां
मित्यादि ।८४। तासां ध्यानमाह । इमादृत्तिः कमाद्धिद्याद्या आयुधानि दधतीः ।८६। तस्य भूपुरस्य तृ
तीय रेखायां दिक्षु ऊर्ध्वे अधश्च सर्वसंक्षोभिण्याद्या दशमुद्रा यजेत् । ह्रीं श्रीं सर्वसंक्षोभिणीमुद्राश्रीपा० मुद्रावर्णान्त्य
णानुक्तानि । एवं प्रथमावरणमाराध्य त्रैलोक्यमोहने चक्रे इमाः प्रकटयोगिन्यः पूजितास्तर्पि

ताः इष्टदाः संचिंतितिन्यार्घ्य मूलेन त्रिर्देवीपुष्पांजलिं दद्यात्। ततः षोडशारे विलोमेन पश्चिमादि षोडशाकर्ष
ण्याद्याः शक्तीः पूजयेत्। ए ३। ऐं ह्रीं श्रीं कामाकर्षणी शक्तिश्री पा० इत्यादि। ए ४। एवं द्वितीयावरणं संपू
ज्य सर्वाशापूरके चक्रे एताः षोडश गुप्तयोगिन्यः पूजितास्तर्पिताः संतु इत्युक्त्वा द्राविण्या मुद्रां दर्शये
त्। ए ५। अष्टवर्गान्विते अष्टारे पूर्वादि अनुलोम्येन अनंगकुसुमाद्याः पूजयेत्। ऐं ह्रीं श्रीं अनंगकुसुमाश्री
पा० ए ८। एवं तृतीयावरणं संपूज्य सर्वसंक्षोभणे चतुर्दशारे कादिचतुर्दशार्णयुते इंद्रगोपप्रभायु
क्तरूपाः दर्पणपाशाधर वामकराः पानपात्रांकुशाढ्य कराः सर्वसंक्षोभण्याद्याश्चतुर्दश शक्तयः
पश्चिमादि विलोमतः पूज्याः। ऐं ह्रीं श्रीं सर्वसंक्षोभिणीश्रीपादु० इत्यादि। १४। एवं चतुर्थावरणमाराध्य
सर्वसौभाग्यदे चक्रे चतुर्दशसंप्रदाययोगिन्यः पूजिताः संतु इत्युक्त्वा वश्यमुद्रां दर्शयेत्
। १६। बहिर्दशारे वर्णयुते दशारे पश्चिमादि अनुक्रमेण सर्वसिद्धिप्रदाद्याः दश पूजयेत्। ऐं ह्रीं श्रीं स

र्वसिद्धिप्रदाश्रीपा· ।११। एवं पंचमावरणं संपूज्य सर्वार्थसाधके चक्रे इमा दश कुलयोगिन्यः पू
जिताः संत्विति क्रोन्मादमुद्रां प्रदर्शयेत् ।१५।१६। ततोपवेदस्रारे मातर्णाधृते ज्ञानमुद्रावरदहस्तक
राः टंकपाशाचापमकराड्कुशद्वित्रिनिगाः सर्वज्ञाद्या दश पूजयेत् ।ह्रीं श्रीं सर्वज्ञाश्रीपा· ।११७। एवं ष
ष्ठमावरणमभ्यर्च्य सर्वरक्षाकरे चक्रे इमा[illegible]मादशानिगर्भयोगिन्यः पूजिताः संत्विति क्रोंकुशा
मुद्रां दर्शयेत् ।१८। ततोष्टारे रक्तवर्णा बाणवरदहस्तकरा धनुर्विद्यावामकरान्यासो क्षाम्रष्ट
वशिन्याद्याः ठंडक्रवीजपूर्विका यजेत् ।ह्रीं श्रीं अं १६। रब्लूं वशिन्यादिवाग्देवताश्रीपा· २१। एवं स
प्तमावरणमिष्ट्वा सर्वरोगहरे चक्रे इमा अष्टौ रहस्ययोगिन्यः पूजिताः संत्विति मुक्त्वा खेचरीमुद्रां दर्श
येत् ।२२। ततोः कस्यादिवर्णोरचिते त्रिकोणे पश्चिमाद्यनुलोमेन चतु।८।ऽर्द्रं तत्तत्स्वबीजपूर्व
कान् जंभमोहवशस्तंभविशेषणविशिष्टान् कामेश्वरकामेश्वर्योर्बाणधनुःपाशांकुशान् पू

जपेत्। बीजान्याह। वाऐति। वाणादौ। पाशादौ। अंकुशास्यादौ तु अंकुशं क्रोमिति। इति देवता आ-
युधदेवताः ॥१२६॥ तासां ध्यानमाह। ज्ञानेति। स्वस्वायुधानि बाणादीनि बाणदेवता बाणधरा इत्या-
दि। प्रयोगो यथा द्रां द्रीं क्लीं ब्लूं सः कामेश्वरकामेश्वरी जंभन बाण श्रीपा० पश्चिमे तिक। धं कामेश्व-
कामेश्वरी मोहन धनुः श्रीपा० उत्तरे। आं ह्रीं कामेश्वर कामेश्वरी वशीकरणपाश श्रीपा० पूर्वे। क्रों का-
मेश्वरकामेश्वरी स्तंभनांकुश श्रीपा० दक्षिणे ॥१२७॥ अग्रेति। अग्रदक्षवामकोणेषु क्रमेण पूर्वास-
न्निविष्टं लक्षणं शक्तित्रयमस्ति तत्रः कामेश्वरी वज्रेश्वरी भगमालिनी संज्ञाः पूज्याः ॥१२८॥ तासां ध्यानमा-
ह। श्लोकत्रयेण। कामेति। वामयोः पुस्तकाभये। वराक्षमाले दक्षयोः ॥१२९॥ इक्षुधनुरभये वामयोः
ऋ। भगेति। हाटकं कनकं। तत्तुल्यकांतिः। ज्ञानमुद्रावरौ दक्षयोः पाशांकुशौ वामयोः ॥१३१॥ प्रयोगो य-
था। कएईलह्रीं कामेश्वरी रुद्रशक्ति श्रीपा०। हसकहलह्रीं वज्रेश्वरी विष्णुशक्ति श्रीपा०। सकलह्रीं भग-

मालिनीब्रह्मशक्तिश्रीपा०एवमष्टवारणमिष्ट्वासर्वसिद्धिप्रदेचक्रे इमा अतिरहस्ययोगिन्यःपूजिताः
संतिवतिस्तुष्टामूलेनपुष्पांजलिंदत्वाबीजमुद्रांप्रदर्शयेत्।३३ ततोमूलविद्यांपठित्वाविंदौश्रीमत्त्रि
पुरसुंदरीश्रीपादुकांपूजयामीतियजेत्।एवंनवमावरणमाराध्यसर्वानंदमयेचक्रेसर्वाभीष्टदायि
नीपरापररहस्ययोगिनीश्रीमत्त्रिपुरसुंदरीपूजितास्तु।इत्युक्त्वायोनिमुद्रांप्रदर्शयेत्त्रिस्तर्प्यपि
त्वाधूपादीनिदत्वागणपतिवाहनाद्युत्वोह्वासयेत्।१३७ ततईशानादिकोणेषुक्रतत्रोमेणवटुकयोगि
नीक्षेत्रपालगणेशौययःपूर्वोक्तैःस्वस्वमंत्रैस्तत्तन्मुद्रादर्शनपूर्वकं।बलिंदद्यात्।१३९ ततोनमस्का
रान्।१४० नवावृत्तिसुतांनवावरणैहत्वैतुक्तां।४१ प्रयोगानाह।नवेति।४२ चंद्रःकर्पूरं।कामाधि
कोमनवेरूपेणेतिशेषः।१४३ दधीतिदध्याशोस्यं।आज्येनसंपदंदुग्धेनकामं मधुनाधनमिति।क्र
मः।१४५ राजन्यपूनामान्युपादिइतिपूर्वेणसंबंधः।४६ मातुलुंगबीजपूरेहुतेत्रियाःवश्याः। एवम

गेति ।४७। भूमिर्वै स्मृतस्त्याः आदित्यो वरुणाः स्मृतिस्मर्थः ।१५०। मध्ये मंत्रम ध्येयत्कूर्णयो गाल्कुवेरोपासित
द्वयो द्वात्रिंशाङ्क्ष्मले ग्रंथगौरवभीत्या नोक्ताः। अनन्यैश्चोपासिता या सर्वेष्ट सिद्धेश्च अमुख्यैर्येव कामराज
विद्यास्तेमे दायथा। हसकएईलह्रीं। हसकहएईलह्रीं। सहकएईलह्रीं ।१। सहकएईलह्रीं। सहकहए
ईलह्रीं। हसकहएईलह्रीं ।२। एतत्कौबेरी द्वयं। कूटद्वयं कामराजीयं। सहसकलईहसकलह्रीं। हसकहल
ह्रीं ।४। एतद्द्वयमगस्त्योपासितं। हसकलह्रीं। अंत्ये कामराजीये पञ्चार्ध द्वयं कामराजीयं। सहसकलह्रीं
६ एतद्द्वयं लोपामुद्रोपासितं। सहक एईलह्रीं। सहकएईलह्रीं ७। हसकएईलह्रीं। सहकएईलह्रीं
तृतीयमीदृशमेव ८। चांद्री द्वयमेतत्। सकलह्रीं। सकहलह्रीं। हसकलहह्रीं ९। कएईलहह्रीं। हस
कहलहह्रीं। सलहह्रीं १०। एतद्द्वयं दुर्वाससोर्चितं। आद्यं कामराजतुल्या ११। अंत्ये एता दृशी एव १२। ऐंद्री
द्वयमेतत्। सएईलह्रीं। हकहलह्रीं। सकलह्रीं १३। सहसकलह्रीं। सहसकलह्रीं। आद्यमेवतृतीयं १४

नं॰टी॰
५२

नंदिविद्याद्वयमेतत्। हसकलह्रीं। सकहसकलह्रीं। हसकहलह्रीं। २७। आद्यं कामराजीयं। हकहस
रह्रीं। हसकलह्रीं। २८। ब्राह्मीयं। सहलह्रीं। सहकहलह्रीं। सकलह्रीं। वैष्णवीयं। २९। आद्यं कामराजी
यं। हकहलह्रीं। सहकलह्रीं। ३०। उन्मनीयं। हसकलह्रीं। सहकलह्रीं। सकहलह्रीं। ३१। सौरीयं। एतेभे
दाः एभ्यां श्रीबीजादिभिः संपुटिताः कामराजवदेव उपासनमपि। १५४। गोपालसुंदरीं वदति। म
येति। माया ह्रीं। रमा श्रीं। चित्तजन्मा क्लीं। कृष्णाय। प्रथमकूटं। गोविंदाय द्वितीयं। गोपीजनवल्लभा
यतृतीयं। स्वाहा। वह्नियुग्मार्णत्रयो विंशतिवर्णाः। १५८। ५९ षडंगमाह। मायेति। ६०। वर्णन्यास
माह। मूर्ध्नीति। ६२। हृदादिवाकृतः स्थितिन्यासः पादादिमूर्धांतः संहारन्यासः। एवंन्यासत्रयं कृत्वा
पुनः सृष्टिस्थितिन्यासौ कुर्यात्। १६४। करशुद्धिन्यासासनन्यासवाग्देवतान्यासान्सुंदर्युक्तानत्र कृ
त्वा मूर्धमुखहृत्सु कूटत्रयं न्यसेत्। ६५। ध्यानमाह। क्षीरेति। क्षीरसमुद्रस्य कल्पद्रुमवनेविलस

५२

न्दरत्नेमुकुट्योमंडपस्कंदंतः प्रद्योतिपतञ्ज्जीपीठंतत्रस्थितमष्टकरंपद्मचक्रबाणवेणुद्वन्द्वकरं चापपांशां
कुशवीणाकामकरं।अवनिमाम्यांधरालक्ष्मीभ्यांयोभितं ब्रह्मादिसुरैस्तूयमानंगोपालंध्यायेत्।
६९।७०।७१।निधीनाह।महापद्मइति।७२।ततःसुंदरीमंत्रोक्तानिनवावरणानियजेत्।७३।
अनेनःसायुज्यंब्रह्मलक्ष्यंप्राप्नोति।७४।इतिश्रीमंत्रमहोदधिटीकायांनौकायांसुंदरीपूजनंनाम
वादशस्तरंगः।हनुमतोमंत्रान्वक्तुंप्रतिजानीते।अथेतिमंत्रमुद्धरति।इंद्रेति।वराहोहः।इन्द्रस्वरऔ
विंदुश्चताभ्यांयुतः हौं।हसफस्वरूपं।अग्निःर।एतेझिंटीशविंदुयुताः।एविंदुयुताः।तेन ह्स्फ्रें।गदा
खपांतान्गिनरूर्ध्वंदुयुतः।पांतः फः।अग्नीरः।रुद्र एइंदुर्विंदुःतैर्युतः ख्फ्रें।हसरामनुचंद्रद्वा।औविंदु
युताः ह्स्रौं।हसखफराः।खिशिवैंद्वास्ताः एविंदुयुताः।ह्स्ख्फ्रें।हसौमन्विंदुगो।औविंदुयु
तो ह्सौं।परंषष्ठं।ङेयुतोहनुमान्हनुमते।हार्दंनमः।४।षष्ठं ह्सौमितिवीजं।द्वितीयं ह्स्फ्रें मितितृतीयं ख्फ्रें:

हौं हृत्। ह्स्फ्रें शिरः ह्स्ख्फ्रें शिखा इत्यादि। वर्णन्यासमाह। मूर्द्धीति। एकैकं सर्वत्र। ६। पदन्यासमाह। ओडि
ति। पदद्वंद्वं हनुमते नम इति। ७। ध्यानमाह। बालेति। बालार्कज मेतं। ८। नानाह। रामभक्त इत्या
दि। १९। २०। शाल्मलताद्यो वा स्त्रयं मंत्रितेन जलस्नानमार्ज्जितान् प्रविरात्नष्टु बंधतिनरयं ति २१। देहचं
दनं देहे धृतं यन्त्रं दनं। तेन युतं भस्मांबु च मंत्रितं यमादयेत्स नरः स्यात्। २। ईशाने त्यादि तरुं हुं चि
रमित्स्यंते न एकः प्रयोगः। भूतांकुशा तरोः करंजस्य। प्ररिष्ठस्य। ईशानदिक्स्थितेन मूलेन लेनांगु
ष्टमि। तां हनुमत्प्रतिमां कृत्वा प्राणान् संस्थाप्य सिंहरैरभ्यर्चयेत्। इह वारि निखन्यते तत्र सर्वोपद्र
व। ना शास्या हृद्विघ्न। २९। ३०। ३१। शिवार्चितं शिवेनापि रक्षितं शत्रुमेवं कुर्वन्नरः स्यात्। प्रईदृचं
ड्रेत्यादि रिपुमुद्धतमित्यंतस्य को मारणप्रयोगः। उन्मतो धत्तूरः। ३२। श्लेष्मांतकः। विभ्रुणपलोह
लः। -श्र-णोविभीतस्तद्रु स्पसमिद्भिश्च रेत् जुहुयात्। सप्तपञ्चस्मात्। विंधदिवसान्। ३५। ३७। प

राधीनो वशो भिगडात्। अं रवल्यो तो मुच्यते। विद्वेषणादीनि। द्वेष मारणोच्चाटनं तत्र पत्रे बलिख
न्नेवमेव कुर्यात्। अमुकं द्वेष यद्धतिमारणोद्भूत्या दिपत्रे बलेखनं। ३९। कुबेराक्षः स्तम्भकण्टि
कः स्तूपविशेषः। ४०। यक्षास्ये होमस्तदा सिः। राजीलवणपुतेन यस्याः हृदजसाहूयते स म्रियते। ४२
मंत्रमाह। वलयेति। पुञ्जाकारं वलयत्रमं विलिख्य मध्ये ग्लामिति बीजे न वेष्टितं। साध्यनाम
लिखेत्। तदुपर्यष्टदले पुकु मिति। ४५। बहिरेकवलयं कल्वोपरि चतुरस्रं कृत्वा तद्गतकोणेषु व
र्णतत्र त्रिशूलानि कृत्वा त्रिशूले पु क्रोमिति। वज्रेषु ह्लौमिति विलिख्य तन्मालामंत्रेण वदयमाणे
न संवेष्ट्य तत्पुनर्वलयत्रयेण वेष्टयेत्। ४८। नाभिः कस्तूरी। त्वक्ता शठउपवासी। ५०। ५१। मा। नामंत्र
माह। मलाव इति। वाक् ऐं। हरिप्रिया श्रीं। मायादी धमंत्रया न्विता ह्रां ह्रीं ह्रूं पूर्वोक्तं स्तानमं त्रस्यं। ५२। ५५
म्नत्रिर्द्दः। वायुःवा। स्वरूपमन्नत्। यथा ॐ नमो हनुमते प्रकटपराक्रम माक्रांत दिग्मंडलयशो वित

42

न घनली कृतजगद्वितय वज्रदेह ज्वलदग्निसूर्यकोटिसमप्रभ तनूरुह रुद्रावतार लंकापुरीद
हनो दधिलंघन दशग्रीवशिरःकृतांतक सीताश्वासन वायुसुत अंजनीगर्भसंभूत श्रीरामलक्ष्म
णानंदकर कपिसैन्यप्राकार सुग्रीवसख्यकारण वालिनिबर्हणकारण द्रोणपर्वतोत्पाटनाशो
कवनविदारण अक्षकुमारच्छेदन वनरक्षाकरसमूहविभंजन ब्रह्मास्त्रब्रह्मशक्तिग्रसन ल
क्ष्मणशक्तिभेदनिवारण विशल्यौषधिसमानयन बालोदितभानुमंडलग्रसन मेघना
दहोमविध्वंसन इंद्रजिद्वधकारण सीतारक्षक राक्षससंघविदारण कुंभकर्णादिवधपरायण
श्रीरामभक्तितत्पर समुद्रव्योमद्रुमलंघन महासामर्थ्य महातेजःपुंजविराजमान स्वामिवच
नसंपादित अर्जुनसंयुगसहाय कुमारब्रह्मचारिन् गंभीरशब्दोदय दक्षिणाशामार्तंड मेरुपर्वत
पीठकार्चन सकलमंत्रागमाचार्य मम सर्वग्रहविनाशन सर्वज्वरोच्चाटन सर्वविषविनाशन

सर्वा पन्निनि वारण सर्व दुष्ट निवर्हण सर्व क्षा घ्रादि भय निवारण सर्व शत्रुच्छेदन मम परस्य तत्रि भुवन स्त्रीन पुंकात्मकं सर्व जीव जातं वशा पय वशपय मम आज्ञा कारकं संपादय संपादय नाना नाम धेया न्सर्वा न्राज्ञः सपरिवारान् ममेव कान् कुरु कुरु सर्व वि षा लि ध्वं सय हां ह्रीं ह्रूं ह्रैं ह्रौं एह्येहि ह्स्ख्फ्रें ह्स्रौं ख्फ्रें ह्स्ख्फ्रें हें सर्व त्रि शत्रून् हन हन परव लानि परसैन्या नि क्षोभय क्षोभय सर्व कार्य जातं साधय सर्व दुष्ट दुर्ज्जन मुखानि कीलय कीलय घे घे हा हा हुं हुं हुं फट् फट् स्वाहा। मा [illegible] मंत्रो पमन्ष्टा शील घिकपं च शत वर्णः। ५८८। मंत्रांतर माह। वादशेति द्वादशाक्षर स्यांतिमा नृषद्वर्णान् हनुमते न मइति प्रथम मसे कं हो मिति तिम्न स्कार शेषः पंचाक्षरो मंत्रः। ह्स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं इति। ७८। ७९। षडंगमा ह। रामदूतेति। हनुमदा द्याश्चतुर्थ्यंता वीज पूर्वाः षडंग मंत्राः। यथा ह्स्फ्रें हनुमते हत्त् ख्फ्रें रामदूताय शिरः ह्स्रौं लक्ष्मण प्राणदात्रे शिखा इत्यादि। पूर्ववत् द्वादशा र्णवत्। ८१। मंत्रांतर माह। तारइति

री·
५५

तारं ऊं। वाक् ऐं। कमला श्रीं। मायादीर्घत्रयान्ता ह्रां ह्रीं ह्रूं। पंचकूटानि च। अद्वानी मुक्तानि। ऋ त्वर्गं कए को
दशाक्षरः॥८४॥ मंत्रांतरमाह। हृदयमिति। तद्वत् ऊँ तो। नमो भगवते आंजनेयाय महाबलाय स्वाहा इति
॥८५॥ अंगमाह। ॐ आंजनेयइति। ओं आंजनेयाय हृत्। रुद्रमूर्तये शिरः इत्यादि॥८६॥ ध्यानमाह। दहने
ति।८७। प्रयोगानाह। जितेंद्रियइति॥८८॥८९॥९०॥ उदररोगनाशकं मंत्रमाह। पवनेति। षष्ठो जात
ओंकारस्तद्युतं पवननंदनं पंचवदनं यो यो हनूस्वरूपे। यो शं का टो महाकालः। सविंदुर्मः। मं। कामिका
तः फलफस्वरूपे॥९६॥ सनेत्रा त्रिपा। इष्टुतो लः। ल्लि। णं तस्तः। मीनो घः। गस्वरूपे। सात्वतो घः। गि
तेः आपुराख्यस्वरूपे॥ लोहितपः। रुगहस्वरूपे। वेदनेत्रा द्वारश्चतुर्विंशत्यर्णः मया। यो यो हनूमंत फ
लफलित धगधगित आपुराख्य परुगह इति॥९८॥ स्त्रीहरोगउदररोगः। तन्नाशकः। प्रयोगमाह।
स्त्रीहेति॥९९॥१००॥ आरण्यवृक्षस्तरोत्पन्नो॥ वनपाषाणाग्निः कासिते ग्नोवदग्धुत्यां पष्टिं सप्तधा

स्मातेनतापयेत्।१०१। तथोदरस्थितेवंशखंडेनाडितेरोगोनश्यति।१०२। अथोगांतरमाहपुच्छेति। पुच्छाका
रेवलक्षेकोकिलाविष्ठलेखिन्मात्सृगंधेहनुमद्रूपंकृत्वातदुदरेष्टादशार्णं विलिख्याभिमंत्रितेनशिरो
वेष्टनेनतेनारीन्जयति।१०३।४।५।६।७। यंत्रमाह। लिखेदिति।८। अष्टार्णमालामंत्रौवक्ष्यमाणो।१०९।
१०। दुरोदरे भूते।११०। ११। अष्टार्णमाह। वियदिति। वियलहः। अग्नीरः। यथा। ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रः ॐ। इति।११२
मालामंत्रमाह। वज्रेति ॐ कृष्णकायवज्रतुंडकपिलपिंगलऊर्ध्वकेशमहाबलरक्तमुखतडिज्जिह्व
महारौद्रदंष्ट्रोत्कटकह करालिनेमहादृढप्रहारिन् लंकेश्वरवधायमहासेतुबंधमहाशैलप्रवाह
गगनेचर एह्येहि भगवन् महाबलपराक्रम भैरवाज्ञापय एह्येहि महारौद्रदीर्घपुच्छेन वेष्टय वैरिणं
जंभय जंभय हुं फट्। बाणनेत्रैं दुवर्णैः पंचविंशत्युत्तरशतार्णैः।११९। अष्टार्णमालामंत्रौस्वतंत्रावि
तिसिद्धवचनाह। अष्टार्णेति।१२०। इतिश्रीमंत्रमहोदधिटीकायांनौकायांहनुमन्मंत्रकथनंनामै

44

मन्त्रयोदशाक्षरांगः ।१३। इति श्रीमंत्रमहो ।१३। श्रीविद्यामंत्रान्प्रवक्तुं प्रतिजानीते अथेति । मंत्र
माह । मेरुरिति । मेरुः क्षः । कृशानू रः । अनुग्रह औ । तेन क्ष्रौं ।२। मायाह्रींतत्संपुटः अएवपुटश्चेति
ह्रौं अएँ । अपहरे मायापुटवीजेन षडंगं । ह्रीं स्रौं ह्रीं हृत् । ॐ स्रौं ॐ हृत् इत्यादि ।४। ध्यानमाह । तपने
ति । सूर्येंद्वग्निनेत्रं । घनेति घन विरामः श्वारत् तत्र पः स्थितां शुभ्रांशुः तन्तुल्यकांति । घनसपानगलमि
तिपाठे नीलकंठं । शशिसमप्रभं । शशिनासमानाप्रभायस्य तं ऊर्ध्वयोर्हस्तयोः वामयोः अंके पिनाकौ
अधस्थयोर्वामयोः इंदुधरं शशिशेखरं ।५। विमलादयष्टकाः शातानंदं ब्रह्माणं ।७। तावतो द्वात्रिं
शास्त्र्यः कान्त् ।८। ताना ह कमुद इति ।९।१०।१२।१३। प्रयोगानाह । सहस्रेति । शतपर्वा दूर्वा ।१४।१५।
१७। निशि दुःस्वप्ने दृष्टे मंत्रं जपन्न वशिष्टां निशां नयेत् । स दुःस्वप्नः सुस्वप्न एव फलं ददाति ।१८।
प्रसंगान्मारणप्रायश्चित्तमाह । प्रजपेदिति । अभिचारजातपापनिवृत्त्यै अयुतं जपेदिति ।२१। पु

त्रजीवेद्दे पुत्रजीवतरु काष्टदीप्तेनोत्तरकल्लैः पुत्रजीवकजैः पुत्राप्तोऽस्तु स्यादिति। २२। २३। मंत्रांतरमाह
जयेति। यथा जयजयश्रीनृसिंह इति। २५। नेत्रे इ शक्तिः वियन्नहः बीजं अस्मे शक्तिबीजे बिंदुयुतो दी
र्घयुतेन स बिंदुना वियता हेन षडंगं ह्रां ह्रीं। ह्रां ग्निर इत्यादि। २६। ध्यानमाह। श्रीमदिति। साम्नोराज
सः। यस्य साम्नाराजते प्रकाशते सामगाने कृते प्रत्यक्षो भवति। तीक्ष्णार्थः तीक्ष्णकरोरविः पिनाकपाणे
इत्युपलक्षणं वामभयचक्राणां। वामोर्ध्वादिदक्षोर्ध्वांत। पिनाकाभयवरचक्रधरा इत्यर्थः। मंत्रांतरमा
ह। तार इति। तार ॐ। पद्मा श्रीं हृल्लेखा ह्रीं। रमामायेश्रीं ह्रीं। स्वरूपमन्यत्। यथा। ॐ श्रीं ह्रीं जयलक्ष्मीप्रि
याय नित्यप्रमुदितचेतसे लक्ष्मीश्रितार्धदेहाय श्रीं ह्रीं नमः। पंचत्रिंशदक्षरा। ३०। षड्जा ह्रीं। श्रीं बी
जेन षडंगं। श्रां श्रीं श्रूं इत्यादि। ३१। ध्यानमाह। क्षीराब्धाविति। क्षीरसमुद्रे श्वेतद्वीपे रत्नादि देवैर
न्यादिवत्यास्यानंतावेष्टितः। अग्रे वसुभिः दक्षे रुद्रैः। पश्चिमे आदित्यैः। वामे विश्वेदेवैरित्यर्थः। अधो

वामहस्तयोः शंखचक्रे ॥ ऊर्द्ध्वयोर्गदापद्मा सितश्मश्रुवर्णः ॥ शोभफलमेवातपत्रं तेनलसितोदीप्तः ॥ ईदृक्
नृसिंहो मम मुदे हर्षाय स्तात् भूयात् ॥ ३२ ॥ मंत्रांतरमाह ॥ ब्रह्मणेवेति ॥ नहरेर्बीजं क्ष्रौं ॥ ३७ ॥ ३८ ॥ त्रिह्वि
वारं तारबीजेन ॥ ३९ ॥ ४० ॥ सनेत्रादीर्घा इंद्रयुतो नः ॥ निः ॥ ङेंति मश्चतुर्थ्यंतः ॥ ४१ ॥ नवनवत्यर्णएकोनशता
त्मकः मंत्रो यथा ॥ ॐ क्ष्रौं नमो भगवते नरसिंहाय ॐ क्ष्रौं मत्स्यरूपाय ॐ क्ष्रौं कूर्मरूपाय ॐ क्ष्रौं वाराहरू
पाय ॐ क्ष्रौं नृसिंहरूपाय ॐ क्ष्रौं वामनरूपाय ॐ क्ष्रौं रामाय ॐ क्ष्रौं कृष्णाय ॐ क्ष्रौं कल्किने जयजय
शालग्रामनिवासिने दिव्यसिंहाय स्वयंभुवे पुरुषाय नमः ॐ क्ष्रौं ॥ अत्रैतावतारनामाद्यक्षरावतारयुतो नृसिं
हो देवता ॥ ४२ ॥ क्ष्रौं बीजं ॥ आयेति शक्तिः ॥ क्ष्रां क्ष्रीमित्याद्यंगं ॥ ४३ ॥ ४४ ॥ मंत्रांतरमाह ॥ तारइति ॥ हृदं
नमः ॥ ४७ ॥ वन्हेः कलत्रं स्वाहा ॥ ४८ ॥ बीजं क्ष्रौं ॥ यथा ॥ ॐ नमो भगवते नरसिंहाय नमस्तेजस्तेजसे
आविराविर्भव वज्रनख वज्रदंष्ट्र कर्माशयान् रंधय रंधय तमो ग्रस ग्रस स्वाहा ॥ अभयमात्मनि

रूपिण्यै क्लीं इति। ४९। अन्यत्पूजादि। ५०। गोपालमंत्रमाह। गोपीति। अग्निसुंदरी स्वाहा। ५१। वि
राट्छंदः क्लीं बीजं स्वाहा शक्तिः ५२। पंचांगमाह। आचक्राय हृत्। विचक्राय शिरः। सुचक्राय शि
खा। त्रै। त्रैलोक्यरक्षणचक्राय कवचं। असुरांतकचक्राय अस्त्रं। ५४। वर्णन्यासमाह। मस्तके इ
५५। तारयुगपति। ॐ गो ॐ नम इत्यादि ५६। ध्यानमाह। हृदिति। हृं दावनगाकल्पवृक्षतले मणिपीठे र
त्नातपत्रे स्थितं ध्यायेत्। जीमूताभं मेघश्यामं। स्मरादपि सुंदरं। ५७। ५८। अर्कजा कालिंदी गोपाङ्गना गो
पिकाः। ५९। मंत्रात्मकस्तत्स्वागत प्राणश्वासो कृष्णश्वासो कं सकृत्तया मूर्तं रिपुं स्मरन् रिपुजन्मनक्ष
त्रवृक्षसमिद्भिर्जुहुयात्। नक्षत्रवृक्षा उक्ताः। ६६। ६८। तस्य पीवतं युवतिसमूहः पुरुषान् वशयेत्।
६९। ७१। ७२। मंडलमेकोनपंचाशद्दिनानि तन्मध्ये वांछितं प्रियं प्राप्नोति। ७३। मंत्रांतरमाह। कामः
क्लीं। वियत् हः रेचिका रं रूपयुतं। हा। पीतः षः। वामाक्षिसंयुता ईयुता बीजत्रयी कः। क्लिं। ठ। रा। एतद

ली।
८

सूर्यः के। चक्रः शः। अनंतान्वितः ८ आयुतः स्या। मस्तकं हृदयेन मः। ७७। षडंगमाह। कामेति। क्लीं ह
न् क्लीं शिरः। ध्यानमाह। कायेति। कल्पवृक्षमूलस्थितगरुडासनं बाणपस्थां कुचाशोभादक्षेषु। अन्या
न्येषु ७९। स्वर्यललहं बादक्षालहं। ८०। ठद्वंद्वं स्वाहा। ८१। ८२। मंत्रांतरमाह। कामेति। क्लीं मिति। गोपाल
मुनुतन्मू ज्ञाष्टा एवंवत्। स्त्रियस्त्री वशाकारी। ८८। मंत्रांतमाह। रमेति। रमा श्रीं। भवानी ह्रीं। कंदर्पः
क्लीं। स्मृतिर्गः। ओंपुनागो। यथा। श्रीं ह्रीं क्लीं कृष्णाय गोविंदाय स्वाहा इति। ८९। षडंगमाह। धरेति
धराए कः। ९०। ९१। मंत्रांतरमाह। तारइति। ॐ नमो भगवते रुक्मिणीवल्लभाय स्वाहा। इति। ९२।
पचांगमाह। एकेति। ९३। ध्यानमाह। चिंतेति। चिंतामणियुत निजहस्तेनालिंगिता कांतायेन तं।
वांछहस्तयापत्न्यालिंगितं। स्वर्णपक्षियुतदक्षकरं ९४। ९५। मंत्रांतरमाह। कामइति। क्लीं गोवल्ल
भायस्वाहा इति। गायत्री छंदः। कृष्णो देवता। नारद ऋषिः। अंगैर्नारदादिभिः इंद्रादिभिः। ९६। षडं

माह।वर्णेति।क्लीं गो हृत्।वक्त्र शिरः।मा ए शिखा।ड्यो दिभिः।वज्राद्भिः स्वाहा वर्म।सर्वेणास्त्रं।ध्या
नमाह।पंचेति।निजसौंदर्येन।मोहिताप्सरसं।९७।कलत्रह्रजैः पलाशो स्थैः।९८।९९।संक्रंदनाय
इंद्राद्यैः।१००।मंत्रांतरमाह।कामेति।क्लीं कृष्ण क्लीं।वेदाद्यो [illegible]।१०१।२।ध्यानमाह।कल्पेति
कल्पद्रुमैः कल्पवृक्षस्य प्रसिक्तमनिभिर्वितं।१०३।१०४।१०७।मंत्रांतरमाह।देवकीसुतगोविंदवासु
देवजगत्पते।देहि मे तनयं कृष्ण त्वामहं शरणं गतः इति।ध्यानमाह।विजयेनेति।सर्जुनेन युतोंबु
धिमध्यात्तनपानामीयविप्रायदत्त ध्येयः ११।हरिप्रसंगात्तद्वाहनस्य गरुडस्य मंत्रमाह।नृसिंहेति
नृसिंहः।[illegible]।इत्युक्तः [illegible]।लोहि तः पः।निगमादि [illegible]।कृशानुभार्या स्वाहा।१३।१४।षडंग
माह।ज्वलेति।ज्वल ज्वल महामति स्वाहा हृत्।गरुडचूडानन स्वाहा शिरः।गरुडशिखे स्वाहा शि
खा।गरुड प्रभंजन प्रभंजय प्रभेदय प्रभेदय वित्रासय वित्रासय विमर्दय विमर्दय स्वाहा कवचं।उग्र

47

टी.
९

रूपधरसर्वविषहरमोक्षयमोक्षयसर्वं दह दह भस्मीकुरु कुरु स्वाहा ॥ नेत्रं । अप्रतिहतबल अप्रति
हतशासनं हुं फट् स्वाहा ॥ अस्त्रं । वर्णन्यासमाह वदेति ॥ २० ॥ ध्यानमाह तप्तेति । तप्तहेमाभं तं एणा मुकुटं
विपंचामयं तं ॥ दक्षैवरं पद्मा ध्या मुक्ता रितोः सा म्यां च ह हृयं तरादीनां गीतयो येन तां च हृद्यं तरे पद्मा
वितिष्ठते ॥ २१ ॥ २२ ॥ पक्षिराजाय स्वाहेति पीठमंत्रः ॥ २३ ॥ २४ । गरलं द्वयं विषद्वयं स्याच्चरजेग माख्यं ।
२५ ॥ २६ ॥ धरणीधवे भूपतिभिः सेवितश्चिरं जीविला त्वा तनुद्वयेह ॥ १ रिसा सुजंप्राप्नोति ॥ २७ ॥ इति
श्रीमंत्रमहोदधिटीकायां नौकायां विषमंत्रकथनं नाम चतुर्दशस्तरंगः ॥ १४ ॥ विमंत्रमाह । प्रणव
इति । वं भुवनेशानी ह्रीं । मेधा घः । रेचिकया न्वितः स्मृतः ॥ १ ॥ घ न अग्नि पुक् इयुलसगीचडमाकां
तोणः फि । सूर्य आदित्य स्वरूपं । इन्दिरा श्रीं ॥ २ ॥ ३ ॥ षडंगमाह । सत्येति । सत्यतेजो ज्वालामणे हुं फट् स्वाहा
ज्वलते शिरः । विस्फुते शिखा इत्यादि ॥ स्वपदिति । शिवाग्नियोः ह्रीं श्रीं बीजयोर्मध्ये स्थितैः षड्वर्णैः पुन

षडंगं। कृत्वा शोभव वैश्वमतुर्थ्यंतो सपदृनामोद्सपदृयोर्मसित्यु। यथा। ह्रां ॐ श्री हृत् ह्रीं घं श्री शिरः। ह्रूं णिं श्री
शिखा। ह्रैं हं श्री वर्मः। ह्रौं यं श्री नेत्रं ह्रः आं श्री अस्त्रं। ह्रां दिं श्री उदरायनमउदरे ह्रीं त्यं श्री पृष्ठायनमः पृष्ठे
इत्यंगं। ५। पंचमूर्त्तिन्यासमाह। आदित्यमिति। सद्य ओंकारस्तदादि बिंदुमेन पंचाक्षरस्वाः। ॐ एं ॐ इं अं
एतदाद्यान् ङेनमोंतानादित्यादीन् मूर्द्धादिषु न्यसेत्। यथा। ॐ आदित्यायनमो मूर्द्ध्नि। एं रवयेनमो मु
खे। ॐ भानवेनमो हृदि। इं भास्करायनमो लिंगे। अं सूर्यायनमः पादयोः। ७। वर्णन्यासमाह। मायेतिन
मोन्विता नित्यपिंडो ऽयं। यथा। ॐ ह्रीं ॐ श्री नमो मूर्द्ध्नि। ॐ ह्रीं घं श्री नमो मुखे। ॐ ह्रीं णिं श्री नमो लिंगे। ॐ
ह्रीं सूं श्री नमो हृदि। ॐ ह्रीं र्यं श्री नमः कुक्षौ। ॐ ह्रीं आं श्री नमो नाभौ। ॐ ह्रीं दिं श्री नमो लिंगे। ॐ ह्रीं त्यं श्री न
मः पादयोः। ८। मंडलन्यासमाह। स्वरानिति। विधुचंद्रंस्मरन्वचंद्रमंडलं न्यसेत्। यथा। अं १६। सोममंड
लायनमः। शिखादिकं गतं। ९। बार्गान्कादीन्मांतान्यथार्कं २५। सूर्यमंडलायनमः। कंठादिना

